# वैयाकरणसिद्धान्तकौमुदी

## अजन्तनपुंसकलिङ्गप्रकरणम् (२)

०५.०७.२०११

गीतगोविन्दसंस्कृतसङ्घः - २०११

# पुनरावर्तनम्

- अकारान्तनपुंसकलिङ्गाः
- स्वमोः अमादेशः ('अतोऽम्')
- औङः शी ('नपुंसकाच्च')
- जस्-शसोः शिः ('जश्शसोः शिः')
- 'नपुंसकस्य झलचः' इति नुमागमः
- शेषं पुंवत् ।

- नपुंसकलिङ्गे सर्वनामानि ।
- अकारान्तः नपुंसकलिङ्गः सर्व-शब्दः ।
- प्रथमा-द्वितीयाविभक्त्योः ज्ञानशब्दवत् ।
- तृतीयादिषु पुंलिङ्ग-सर्व-शब्दवत् ।

- अकारान्तः नपुंसकलिङ्गः ‘कतर’ शब्दः ।

# ३१५. अद्डतरादिभ्यः पञ्चभ्यः (७.१.२५)

- पदत्रयम् । अद्ड्, डतरादिभ्यः, पञ्चभ्यः ।
- 'स्वमोर्नपुंसकात्' (७.१.२३) इत्यनुवर्तते ।
- एभ्यः क्लीबेभ्यः स्वमोः अद्डादेशः स्यात् ।

- डतरादिः सर्वाद्यन्तर्गणः ।
- सर्व, विश्व, उभ, उभय, डतर, डतम, अन्य, अन्यतर, इतर, त्वत्, त्व...

- कतर (सुँ) स्
- कतर अद्ड् (अद्डतरादिभ्यः पञ्चभ्यः)
- कतर अद् ('हलन्त्यम्' – १.३.३, 'तस्य लोपः' – १.३.९)

# ३१६. टेः (६.४.१४३)

- एकपदात्मकं सूत्रम् ।
- 'ति विंशतेर्डिति' (६.४.१४४) इत्यतः 'डिति' इति अनुवर्तते । 'भस्य' (६.४.१२९) इत्यधिक्रियते ।
- डिति परे भस्य टेः लोपः स्यात् ।
- कतर अद्
- कतर् अद् ('टेः' – इति टिलोपः)
- कतरत् ('वाऽवसाने' – ८.४.५६ – इति वा चर्त्वम्)
- चर्त्वाभावे कतरद् ।
- कतरे, कतराणि ।

- ‘भस्य’ किम्?
- पञ्चमः ।
- पञ्चन्  -शब्दस्य डट्-प्रत्ययः, तस्य मट्-आगमः । अत्र डटः डित्त्वेऽपि यजादित्वाभावात् भसंज्ञा न ।

- टेः लुप्तत्वात् ‘प्रथमयोः..’ इति पूर्वसवर्णदीर्घः, ‘एङ्ह्रस्वात्..’ इति सम्बुद्धिलोपश्च न भवति ।
- हे कतरत् ।
- पुनस्तद्वत् । शेषं पुंवत् ।

- कतमत् ।
- इतरत् ।
- अन्यत् ।
- अन्यतरत् ।
- अन्यतमशब्दस्य तु अन्यतमम् इत्येव ।
- ‘एकतरात् प्रतिषेधो वक्तव्यः’ (वा)
- एकतरम् ।

अकारान्तः नपुंसकलिङ्गः अजर-शब्दः । (अविद्यमाना जरा यस्य तत्)

अजर (सुँ) स्

अजर अम् (‘अतोऽम्’ – ७.१.२४)

- अजादित्वात् ‘जराया जरसन्यतरस्याम्’ (७.२.१०१) इति जरसादेशे प्राप्ते,
- सोरमादेशे कृते संनिपातपरिभाषया न जरस्

अजरम् (‘अमि पूर्वः’ – ६.१.१०७)

- अजर औ
- अजर (शी) ई (‘नपुंसकाच्च’ – ७.१.१९ – इति औङः शी)
- अजरस् ई (‘जराया जरसन्यतरस्याम्’ – ७.२.१०१)
- अजरसी
- आदेशाभावपक्षे
- अजरे (‘आद्गुणः’ – ६.१.८७)

- अजर (जस्) अस्
- अजर (शि) इ ('जश्शसोः शिः' – ७.१.२०)
  - परत्वाज्जरसि कृते झलन्तत्वात् नुम्
- अजरस् इ ('जराया जरसन्यतरस्याम्' – ७.२.१०१)
- अजर न् स् इ ('नपुंसकस्य झलचः' – ७.१.७२)

# ३१७. सान्तमहतः संयोगस्य (६.४.१०)

- पदद्वयम् ।
- ‘ढ्रलोपे पूर्वस्य दीर्घोऽणः’ (६.३.१११) इत्यतः ‘दीर्घ’ इति, ‘नोपधायाः’ (६.४.७) इति, ‘सर्वनामस्थाने चासम्बुद्धौ’ (६.४.८) इति च अनुवर्तते ।
- सान्तसंयोगस्य, महतः च यो नकारः तस्य उपधायाः दीर्घः स्याद् असम्बुद्धौ सर्वनामस्थाने परे ।
- अजरन् स् इ
- अजरान् स् इ (‘सान्तमहतः संयोगस्य’ – ६.४.१०)
- अजरांसि (‘नश्चापदान्तस्य झलि’ – ८.३.२४)
- आदेशाभावे,

- अजरन् इ (‘नपुंसकस्य झलचः’ – ७.१.७२ – इति अजन्तस्य नुम्)
- अजरान् इ (‘सर्वनामस्थाने चासम्बुद्धौ’ – ६.४.७ – इति उपधादीर्घः)
- अजराणि (‘अट्कुप्वाङ्नुम्व्यवायेऽपि’ – ८.४.१ – इति णत्वम् )

- अमि लुकः अपवादम् अम्भावं बाधित्वा परत्वात् जरस् ।
    - 'स्वमोर्नपुंसकात्' (७.१.२३)
    - 'अतोऽम्' (७.१.२४)
    - 'जराया जरसन्यतरस्याम्' (७.२.१०१)
- ततः संनिपातपरिभाषया न लुक् ।
- अजरसम्, अजरम् ।
- अजरसी, अजरे ।
- अजरांसि, अजराणि ।
- शेषं पुंवत् ।

‘पद्दन्...’ इति हृदय-उदक-आस्यानां हृद् उदन् आसन् ।

हृदय (शस्) अस्

हृदय (शि) इ ('जश्शसोः शिः' – ७.१.२०)

हृद् इ ('पद्दन्नोमास्हृन्निश्...' – ६.१.६३)

ह न् द् इ ('नपुंसकस्य झलचः' – ७.१.७२ – इति झलन्तत्वात् नुम्)

हंद् इ ('नश्चापदान्तस्य झलि' – ८.३.२४)

हृन्दि ('अनुस्वारस्य ययि परसवर्णः' – ८.४.५८)

हृदा, हृद्भ्याम् इत्यादि ।

- उदक (शस्) अस्
- उदक (शि) इ ('जश्शसोः शिः' – ७.१.२०)
- उदन् इ ('पद्दन्नोमास्हृन्निश्...' – ६.१.६३)
- उदानि ('सर्वनामस्थाने चासम्बुद्धौ' – ६.४.८ – इति उपधादीर्घः)

- उद्ना (भसंज्ञायाम् 'अल्लोपोऽनः' – ६.४.१३४ – इति अल्लोपः)
- उदभ्याम् (पदसंज्ञायां 'नलोपः प्रातिपदिकान्तस्य' – ८.२.७ – इति नलोपः)

- आसानि
- आस्ना, आसभ्याम् इत्यादि ।

- मांस-पृतना-सानूनां मांस्-पृत्-स्नवो वाच्याः (वा) ।
- मांस (शस्) अस्
- मांस (शि) इ ('जश्शसोः शिः' – ७.१.२०)
- मांस् इ ('मांस-पृतना...' )
- मांसि

- मांसा

- मांस भ्याम्
- मांस् भ्याम्
- मान्  भ्याम्  (‘संयोगान्तस्य लोपः’ – ८.२.२३ – इति सलोपः । सलोपे कृते ‘निमित्तापाये नैमित्तिकस्याप्यपायः’ इति परिभाषया अनुस्वारस्य निवृत्तौ नकारः)
- मान्भ्याम्